# सुभाषितप्राशस्त्यम्

**Dr POLA UMAMAHESWARA RAO**
**LECTURER IN SANSKRIT**
**DrV.S.K.G.D.COLLEGE(A)**
**umamahes.pola@gmail.com**

" सुभाषितं " इति पदस्यसुष्टुभाषितं सुभाषितमिति सूक्तं इति च अर्थः भवति । भारतीयवाङ्मये सर्वेषु ग्रन्थेषु वेदादिषु प्राचीनप्रामाणिक ग्रन्येषु अपि सुभाषितानि दृश्यन्ते । वेदादयः उपनिषदः, पुराणानि, आधुनिककाव्यानि अपि नराणां बहुविध प्रयोजनोद्देशेन ग्रथितानि । काव्यस्य प्रयोजन विवरणसन्दर्भे एवं उक्तं---

"काव्यं यशसे ऽर्थकते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मितततयोपदेशयुजे" ॥ का.प्र.प्रथमोल्लासः -1

अस्मिन् श्लोके यानि यानि प्रयोजनानि अपेक्षन्ते तानि सर्वाणि सुभाषितरुपेण काव्येषु परिपूरितानि सन्ति। ' यच्छ्रन्वतांरसज्ञानां स्वादु स्वादु पदे पदे 'इत्यादिभिः वाक्यै स्वादुवचनानि रसज्ञानां आनंदाय प्रकल्पन्ते विविधेष ग्रन्थेषु । श्रीमद्भागवतपुराणेऽपि बहूनि सुभाषितानि , [ सुष्टु भाषितानि ] सन्ति।

## संस्कृतभाषायां सुभाषित स्थानम् :-

" भाषासु मुख्या मधुरा दिव्या गीर्वाण भारती ।
तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम् "II सु.र भा. प्रथमश्लोकः

आङ्ग्लभाषायां एवमुक्तम्Sanskrit Language is the most Important, the sweetest andthe most divine among all the languages. In this Language, Kavya is sweetest and in the Kavya, Subhashitas (good words) are the sweetest.

संस्कृतवाङ्मये सुभाषितं नामविशेषपरिश्रमं विना सुकुमारमतीनामपि व्यवहार ज्ञानसम्पादनसाधनम् । एतस्मिन् सुभाषितसंग्रहे कानिचित् सन्मार्गबोधनपराणि ,अपराणि सुजनस्तुतिपराणि ,अन्यानि राजनीतिबोधकानि इत्येवं नानाविधविषयपराणि मनोहराणि संकलितानि सन्ति । एते श्लोकाः प्रत्येकं स्वतन्त्ररूपेण वर्तन्ते। एकस्य श्लोकस्य अन्येन श्लोकेन साकं सम्बन्धः नास्ति । अत एव एते श्लोकाः मुक्तका इति कथ्यन्ते ।

सुभाषितस्य प्रयोजनं कविनैकेनैवमुक्तः " जाडयम् निहन्ति रुचिमेति करोति तृप्तिं नूनं सुभषितरसोऽन्यरसातिशायी" अन्येन कविवरेण सुभाषितस्य माधुर्यं प्रकारान्तरेण उक्तम् ।

" द्राक्षाम्लानमुखी जाता शर्करा चाम्लतां गता ।
सुभाषितरसं दृष्वा सुधा भीता दिवं गताम् "॥ (संविद् त्रैमासिकी96मे )

इति सुभाषितं श्रुत्वा मनः पुनः पुनः तदेव श्रोतुं अपेक्षते । तेषु कतिपयान् श्लोकान् उद्धरामि अत्र I

"किं वाससा तत्र विचारणीयं
वासः प्रधानं खलु योग्यतायाः ।
पीताम्बरं वीक्ष्य ददौ स्वकन्यां
चर्माम्बरंवीक्ष्य विषं समुद्रः II ( संविद् त्रैमासिकी 1996 मे )

" देशाटनं पण्डित भाषणं च
वाराङ्ना राजसभाप्रवेशः ।
अनेकशास्त्रार्थ विलोकनंच
चातुर्यमूलानि भवन्ति पञ्च 'II ( संविद् त्रैमासिकी 1996 मे )

" यथा चतुर्भिः कनकं परीक्ष्यते
विघर्षणच्छेदन तापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते
श्रुतेन शीलेन कुलेन कर्मणा " ॥ ( संविद् त्रैमासिकी 1996 मे )

संस्कृतभाषायांश्लेषार्थकल्पनया भाषायाः सर्वतोमुखत्वं अतीक स्वारस्यं च दृश्यते ।

" सुवर्णालंकृता कन्या हेमालंकारवर्जिता ।
सा कन्या विधवा जाता गृहे रोदिति तत्पतिः ।।

अत्र आपाततः विरोधोदृश्यते। तत्र परिहारस्तु एवम् |कन्या सुवर्णालंकृतेत्युक्ते सुवर्णालंकारेण रहिता अपि तस्याः कनकवर्ण एव तस्याःसौन्दर्यं प्रकाशयति । सा कन्या विधवा जाता इत्यत्रापि विगतः धवः यस्याःसा इति अर्थकल्पनं न करणीयम् । विविधाः धवाः यस्याः सा इत्येवं विग्रहवाक्यकरणेनविरोधपरिहारः भवति । तथैव एतादृशींकुलटाम् अहं नियन्त्रयितुं असमर्थः इति गृहे रोदिति पतिः।

अन्यत्र विद्यमानं स्वारस्यमेकं विचारयत। एकहा कृष्णः जनमानेतुं गच्छन्त्याः गोपिकायाः अंसे विनोदार्यं शुकमेकं स्थापितवान् तदा सा कथयति । ' ' 'असंगतं शुकमपनय ' इति । द्राक् तेन तस्याः अंशुकं अपनीतम् I एवं स्वारस्ययुक्तानि स्थलानि बहुनिसन्ति।

"गणिकागणिकौ च समानधर्मौ निजपंचांगनिरीक्षकावुभौ I

जनमानसमोहकारिणौ विधिना वित्तहरौ विनिर्मितौ "II

कविना गणिका गणकश्च समानशीलौ गणितोयथा, गणकः तिथिवार नक्षत्रयोगकरणानि गणयित्वा मुहूर्तमादिशति । गणिका च नेत्रम् , मुखं , स्तनं , नितम्बं, इत्यादि पंचस्थलानि दर्शयित्वा जनानां मनः अपहरति I " ब्राह्मणावित्तापहरणार्थं जनमानसमोहार्थं एतो निर्मितौ" इति स्पष्टोऽर्थः।

द्वयोः संख्योः एवं आलापः संजायते I एका कथयति --- मम भर्त्रा लिखितं अहंपठितुं असमर्था इति, तदा अन्या कथयति – सखि, मे भर्तात्वद्भर्तुः अपि चतुरःI स्वयं लिखितं स्वयमेव न वाचयति । अन्यदेकं हास्यं पश्यत -- एकदा विष्णुः शिवस्य दर्शनार्थं जगाम |कैलासनाथः दिगम्बरःकिल ! सः विष्णुः आगच्छति इति ज्ञात्वा सर्पं एव मेखलां कृत्वा गजचर्मैकं आनीय कौपीनस्थाने दधौ । तदा विष्णुः ताक्षर्योपरि उपविश्य शिवस्य पुरः यावत् गच्छति, तावत् सर्पः स्वशत्रुं सुपर्णंदृष्ट्वा व्यक्तग्रन्थिः अधावत् । तदा शिवः कृतकवस्त्रधारी दिगम्बरः एव जातः । एवं हास्यमेषु सुभाषितेषु दृश्यते । अन्यानि च सुभाषिताब्धौ तत्र तत्र उत्पद्यन्तेजनानां इन्नप्रायाणि जनानां व्यवहारेषु । तानि सर्वाणि अपि संस्कृत भाषायां उद्धृतानि |तेषां स्थानं संस्कृत भाषायांप्रधानम्। भाषणज्ञानाभिवृद्ध्यर्थं अस्य सुभाषितस्य संग्रहः अतीव प्रयोजनकारी इत्यहंनिस्संशयं भणामि ।

**सुभाषितलक्षणम् :–** सुभाषितस्य निर्दिष्टंलक्षणं नोपलभ्यते Iकिन्त्वधोनिर्दिष्ट विषयान् सुभाषितलक्षणत्वेन वदन्ति केचन पण्डिताः।सुभाषितं साधारणतया अत्यल्प परिमाणं एव वर्तते I किन्तु तत्सर्वोत्कृष्टंविषयमुपदिशति । यथा सत्यं वद धर्मं चर इत्यादि Iधर्मार्थकाममोक्षेषु यं कमप्यंशं स्वीकृत्य यद्वाक्यमुपदिश्यते तत्सुभाषितम् I

" धर्मार्थकाममोक्षेषु वैचक्षण्यंकलासुच I
प्रीतिं करोति कीर्तिं च साधुकाव्यनिषेवणम्IIभामहालङ्कारः प्र.प 2

सांधुकाव्यपठनेन यत्प्रयोजनमस्ति तदुपरितनश्लोके प्रपञ्चितम् । अत्र साधुकाव्यस्य प्रयोजनत्वेन यदुक्तं तदेव सुभषितस्यापि प्रयोजनं भवितुमर्हति । कुत इति चेत् काव्यसुभाषितयोर्ध्येयस्त्वेक एव I सच मानव पुरुषार्थसाधनोपदेशः I सुभाषितविषये देशकाल विवेचनाऽ साध्यो I कुत इति चेत् तत् सार्वकालिकं सार्वदेशिकं च विलसति I "रामादिवद्वर्तितव्यम् न रावणादिवदित्युपदेशस्सर्वत्र" सर्वेषां सर्वेष्वपि कालेषु हितकार्येव । सर्वदापि रावणसदृशा जनाः तेषा दुष्कृत्यानां युक्तं फलमाप्नुवन्त्येव | रामसदृशास्तु सर्वदा लोके जनैः समानं प्राप्नुवन्त्येव I

**वाक्य सूत्ररूपेषु सुभाषितानि:–** स्वरूपे सुभाषितं नातिह्रस्वतया नातिदीर्घतया वर्तते । प्रायेणैतत् वाक्यरूपेण ना सूत्ररूपेण वा मुक्तरूपेण वा कदाचित् युग्मविशेषककलापक कुलकरुपैर्वा कथारूपेण वा विलिख्यते।

"गर्भेश्वरत्वमभिनवयौवनवम् अप्रतिमरूपत्वममानुपशक्तित्वं चेति महतीयं खल अनर्थपरं परा | सर्वाविनयानामेकैकमप्येषामायतनं किमुतसमवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मला कालुष्यमुपयाति बुद्धिः " ( कदम्बर्यां शुकनासोपदेशे पूर्वभागः )

एतादृशानि वाक्यरूप सुभाषितानामुदाहरणानि I कादम्बर्यादि गद्यकाव्येषु एतादृशानि सुभाषितानि बहुधा दृश्यन्ते। शुकनासोपदेशे कपिंजलोपटेशः इत्यादयः सन्ति I

वेदान्त भागेषु उपनिषत्सु मन्वादिस्मृतिषुच यानि सुभाषितानि सन्ति तानि सर्वाप्यपि प्रायशः सूत्ररूपेणैव वर्तन्ते। यथा चोक्तं बुधस्मृत्यां ' श्रेयोऽभ्युदय साधनो धर्मः ' इति तैत्तरीयोपनिषत् मध्ये एवमुक्तम् " मातृदेवो भव ,पितृदेवो भव, आचार्यदेवो भव " इति यान्यवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि |एतानि सर्वाणि सूत्ररूप शुभबितानां उहाहरणानि ।

**मुक्तरुपेण सुभाषितानि** – मुक्तकं सुभाषितस्य साधारण रूपं , सर्वेष्वपि सुभाषित ग्रन्थेषु I प्रायस्सुभाषितानि मुक्तरूपेणैव वर्तन्ते । थथा भर्तृहरि सुभाषित त्रिंशत्यामन्येषु च। मुक्तकमिति पूर्वापारा कांक्षारहितस्य संपूर्ण भावयुक्तस्य स्वतन्त्रश्लोकस्य नाम I

लभेत सिकतासु तैलमपि यत्नतः पीडयन्<br>
पिबेच्च मृगत्रुष्टिकासु सलिलं पिपासार्दितः I<br>
कदाचिदपि पर्यटन् शशविषानमासादयेत्<br>
न्न तु प्रतिनिविष्टमूर्ख जन चित्तमाराधयेत् II सु. त्रिशतिः नी.श.